श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥श्रीसरस्वत्यैनमः॥श्रीरस्तु॥
केराजार्कनिशाकरक्षितिजविद्देवेज्यशुक्रार्कजान्विघ्नेशांश्च गुरून्
प्रणम्य शिरसा देवीं च वागीश्वरीं ॥ प्रश्नज्ञानविधौ वराहमिहरा
स पत्यस्य द्वस्तुनि लोकानां हितकाम्यया द्विजवरष्टीकां करोत्युत्पलः॥
१॥करणीयशास्त्रे संबंधाभिधेयप्रयोजनानि वदंतीत्युच्यते ॥ आब्र
ह्मादिविनिःसृतमिदं वेदांगमिति संबंधः॥लग्नं होराद्रेष्काणनवां
शकादिनाग्रहसंस्थानवर्षणेनचगमागमजयपराजयलाभाला
भमृतनष्टादिपरिज्ञानमभिधेयं ॥ सत्पात्रशुभाशुभकथनादि
हलोकसिद्धिः प्रयोजनं ॥ किमेभिरुक्तैरिति ॥ ५ ॥ अत्रोच्यते ॥

१ सिद्धिः श्रोतुं प्रवृत्तानां संबंधकथनाद्भवेत् ॥ तस्मान्सर्वेषु शास्त्रेषु संबंधः पू-
र्वमुच्यते ॥ सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ॥ यावत्प्रयोजनं नोक्तं
तावत्तत्केन गृह्यते ॥ अस्मिन्शास्त्रे ऽधिकारः उच्यते ॥ द्विजस्यैव यतस्ते-
न षडंगो वेदो ऽध्येतव्यो ज्ञातव्यश्च ॥ कान्यंगानि उच्यंते ॥ शिक्षा कल्पो व्या-
करणं निरुक्तं ज्योतिषां गतिः ॥ छंदसां लक्षणं चैव षडंगो वेद उच्यते ॥
सत्यामयमाचार्य शास्त्रारंभे ऽभिमतदेवतानमस्कारं कुर्वंति ॥
तद्वयमप्यावंतिकाचार्य द्विजवर वराहमिहरात्मज पृथुयशोगः ॥ २ ॥
संक्षिप्तां प्रश्नविद्यां स्वसूत्रैः कर्तुकाम आदावेव भगवतः ॥ सूर्यस्य न-
मस्कारं स्वनामख्यापनं चार्यमाह ॥ ५ ॥ प्रणिपत्य रविं मूर्ध्ना वरा- १
हमिहिरात्मजेन सद्यशसा ॥ प्रश्ने कृतार्थगहना परार्थमुद्दिश्य सद्य

सा ॥ १ ॥ वराहमिहिराख्यस्याचार्यस्यात्मजेन पुत्रेण पृथुयशसा
॥ पृथुयशा इत्यभिधानं तस्य तेन रविं सूर्यं भट्टारकं मूर्ध्ना शिरसा प्रणम्य ॥
नमस्कृत्य ॥ प्रश्ने प्रश्नविषये इयं प्रश्नविद्या कृता ॥ कीदृशी ॥ अर्थगहना ॥
अर्थो ऽभिधेयं गहनं दुर्लक्ष्यं यस्याः किमर्थं ॥ उद्दिश्य ॥ परेषां लोकानां हितमु-
द्दिश्याभिप्राय ॥ कीदृशेन पृथुयशसा ॥ सत्शोभनं यशः कीर्तिर्यस्य तथा पृ-
तेन विद्यादैर्यादिगुणयुक्तेनेत्यर्थः ॥ अधुना लग्नचतुर्थसप्तमदशमस्था-
नानां विचारं प्रविवक्षुरागमाह ॥ ५ ॥ च्युतिर्विलग्नाद्धिबुकाच्च वृद्धिर्मध्यात्प्र-
वासोस्तमान्निवृत्तिः ॥ वाच्यं ग्रहैः प्रश्नविलग्नकालात् गन्तुः प्रविष्टो हि-
तुके प्रवासी ॥ २ ॥ च्युतिर्विलग्नादिति सूत्रं ॥ च्यवनं च्युतिः ॥ विलग्ना-
देतात्कालिकात्प्रष्टुर्लग्नात् च्युतिर्ज्ञेया ॥ प्रष्टा पृच्छत्यमुकस्थानान्मे च्युति

२ भवीषातिनवेत्स्येतत् ॥तस्मात् ज्ञेयं ॥ एवंहिबुकात् गृहक्षेत्रवाहनादिति
सुहृत्सुखानां वृद्धिर्ज्ञेयं ॥ मध्यंदशमस्थानं तस्मात् प्रवासो ज्ञेयः ॥ प्रवस
नं प्रावासः ॥ अन्यदेशादेशागमनं ॥ अस्तमयात् सप्तमस्थानात् निवृत्तिः ॥
प्रवासान्निवर्तनं ॥ कथमेतदुच्यते ॥ चरस्थिरराशिस्वभावात् वासकेन ॥
यदुक्तं ॥ प्रश्नविलग्नकालात् ॥ प्रश्नः पृच्छा ॥ प्रश्ने विलग्ने प्रश्नविल
ग्नं तस्य कालः समयः तस्मात् ॥ तेन चरराशौ लग्नगते स्वामिनायुत
दृष्टे परिशिष्टग्रहसंयोगराहितेपि न प्रवत्स्येव ॥ यदुक्तं ॥ वाच्यं ग्रहैः ॥
ग्रहैः कारणभूतैर्वाच्यं ॥ सर्वमेतत् ॥ एवं स्थिरराशौ ग्रहदर्शनसंयोगराहि
तेपि न प्रवत्स्येव ॥ यतो वक्ष्यति ॥ वृषसिंहवृश्चिककुंभघटैर्वा वृद्धिस्थानं गमा
गमान् स्तदति ॥ तथा द्वि[illegible] स्वभावप्रवर्तिभावना ॥२॥ स्वामिशुभग्रह

हृद्दर्शनाधिक्यात् ॥ पापानामल्पकत्वाच्च भवति ॥ अन्यथा न भवत्येव ॥
एवं चतुर्थस्थानस्य सामान्यात्तथैव शुभग्रहस्वामिदर्शनयोगात् गेहादीनां
वृद्धिः ॥ अन्यथा अपचयः ॥ दशमस्थानस्य चरराश्यात्मकत्वात् पापग्रहदर्श
नयोगाच्च प्रवासः ॥ अन्यथा न ॥ सप्तमस्थानस्य चरराश्यात्मकत्वात् ॥
पापग्रहदर्शनयोगाच्च प्रवासनिवृत्तिः ॥ अन्यथा सौम्यग्रहस्वामि
दर्शनयोगात् निवृत्तिः ॥ प्रविष्टो हिबुके प्रावासी ॥ हिबुके चतुर्थस्था
ने प्रावासी विदेशस्थानं स गृहं प्रविष्टो न वेति वक्तव्यः ॥ चतुर्थस्थाने
स्य स्वामियुक्ते शुभग्रहयुक्ते वा गृहं प्रविष्टो न्यान प्रविष्टः ॥ तत्र प्रवि
ष्टस्य यावन्ति दिनानि व्यतीतानि तावत्येन गृहं प्रविष्टः ॥ अस्य प्रवासिना
गतानि ॥ अन्यथा यावद्भिर्दिनैः ग्रहः चतुर्थस्थानं यास्यति तावद्भि

रेव प्रवासी गृहं प्रवेशतीति ॥ एतच्च दूरस्थानगमनमेतास्मिन् वक्ष्य
माणयोगे च सतीति वक्तव्यं ॥ नान्यथेति ॥ एतच्च पुरो दृक्क्षीणो रविः
धीयत इति ॥ अधुनातनवादीनां द्वादशभावानां शुभाशुभज्ञानमाह ॥
॥ यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः ॥
पापैरेवं तस्य भावस्य हानिर्निर्दिष्टव्या पृच्छतां जन्मतो वा ॥ ५ ॥ तनु
धर्मसहजसु[illegible]स्वतारिपुजायामृत्युधर्मकर्मायाः ॥ व्यय इति तनुश्च
भावा द्वादश राशयः स्युः स्थानेषु मेषादिषु धीरैरिति संज्ञा उक्ताः ॥ तथा च ॥ कुजश्शु
केशौ दृक्के तशशुक्रे कुजजीवे सौरियमगुरवः पैशानबोधकानामज
मकरतुलाकर्कटकौ रिराख्याशु । इति राश्याधिपा उक्ताः ॥ क्षीणेंदुर्कय
माराः पापास्तैस्संयुतः सौम्य इति च ग्रहाणां पापसौम्यत्वमुक्तं ॥ २ ॥

तनयच्छास्त्रमेयः कश्चिद्भावस्तन्वादिः स्वामिना आत्मीयेन नाथेन दृष्टो
वलोकितस्तस्य भावस्य वृद्धिरुपचयोस्तीति विद्यते ॥ अथवा तेन स्वा
मिना युतः संयुक्तो यस्तस्यापि वृद्धिरुपचयोस्तीति विद्यते ॥ सौम्यैर्वास्या
त् ॥ सौम्यग्रहाणां बुधशुक्रजीवपूर्णचंद्राणामन्यतमेन यो युक्तो दृ
ष्टो वा भावस्तस्यापि वृद्धिर्वक्तव्या ॥ पापैरेवमिति ॥ एवमनेन
प्रकारेण पापैः पापग्रहै रविसौरभौमक्षीणचंद्राणामन्यतमेन
युक्तो दृष्टो यो भावस्तस्य भावस्य हानिरपचयः निर्देष्टव्यो वक्त
व्यः ॥ कदेत्यपेक्षायामाह ॥ पृच्छतां जन्मतो वेति ॥ पृच्छतां प्र
श्नसमये ॥ जन्मतः नराणां जायमानानां ॥ तथा चोक्तं जातके ॥
पृच्छंतीति शुभाशुभान् मर्त्यादीन् घ्नंति संस्थिताः पापाः ॥

ष॰पं॰चा॰ सौम्यापेष्टेरिष्ठाःसर्वेनष्टाव्ययाष्टमगाः॥ तथाशांतोदीपोजन्मन्या टी॰का॰
धानेप्रश्नकालेवेति॥ अधुनाप्रश्नसमयेलाभादौशुभाशुभसूचनानमा
ह॥ सौम्येविलग्नेयदिवास्यवर्गेशीर्षोदयेसिद्धिमुपैतिकार्यं॥
अतोविपर्यस्तमसिद्धिहेतुः कृच्छ्रेणसंसिद्धिकरंविमिश्रं॥ ८१॥
सौम्येविलग्ने॥ सौम्यानांबुधगुरुसितपूर्णचंद्राणामन्यतमेविल
लग्नस्थितेयदिवासौम्यग्रहस्यवर्गे॥ तत्काललग्नप्राप्ते॥
ग्रहे होराद्रेष्काणनवांशकद्वादशांशत्रिंशांशाः वर्गाः प्रसेतव्या
ग्रहस्ययस्ययोयस्यानिर्दिष्टः॥ इतिवर्गलक्षणमुक्तं॥ अथवा
शीर्षोदयेपृष्ठालग्नेसतिकार्यसिद्धिमुपैति॥ मेषाद्याश्च
त्वारःसधन्विमकराःक्षपाबलाःज्ञेयाः॥ पृष्ठोदयाविमिथुना

श्चिरसान्येवृषभयुतोमीनः॥ मेषवृषककर्किधन्विमकराःपंचराशयः॥
पृष्ठोदयाउक्ताः॥ विमिथुनामिथुनारहिताः॥ अथोत्तरेण्येऽन्येमिथुन
सिंहकन्यातुलावृश्चिककुंभाख्याःषट्शीर्षोदयाउक्ताः॥ एतेषांमध्ये
न्यतमेपृष्ठालग्नेसतिकार्यंसिद्धिमुपैति॥ गच्छति॥ अतोविपर्यय
स्तमिति॥ अतोस्मात्पूर्वोक्ताद्विपर्ययस्तंविपरीतं॥ असिद्धिहेतुः॥
असाध्यतायाःहेतुःकारणं॥ एतदुक्तंभवति॥ पापग्रहेविलग्नस्थे
पापलग्नेवाविलग्नगतेप्रष्टुःकार्यंनासिद्ध्यतीति॥ कृच्छ्रेणसंसिद्धि
करंविमिश्रं॥ एतत्पूर्वोक्तंविमिश्रंसंकीर्णंयदिभवति॥ तदाप्रष्टुः
कृच्छ्रेणसंसिद्धिकरंकार्यसाधकरं॥ एतदुक्तंभवति॥ पापसौम्ययुक्त॥

पं-चा

५ वर्गोत्तमावपि विलग्नस्थो भवतः ॥ पापसौम्यवर्गो वा लाभकालिकलग्नसं
प्राप्तः ॥ शीर्षोदये पापयुक्तः पापवर्गस्थो वा पृष्ठोदयः सौम्ययुक्तः
पापवर्गस्थो वा पृष्ठोदयः सौम्ययुक्तः सौम्यवर्गस्थो वा ॥ उभयोदये वा ॥
तदा हेतुरेनसिद्धिर्न भवति ॥ बालाधिकान्निश्चयइति ॥ अधुनान
ष्टलाभज्ञानमाह ॥ होरास्थितः पूर्णतनुः शशांको जीवेन दृष्टो यदि
वासितेन ॥ क्षिप्रं प्रनष्टस्य करोति लाभं लाभोपयातो बलवान्
शुभश्च ॥ शशांकश्चंद्रः पूर्णतनुः परिपूर्णमंडलः ॥ शुक्लदशम्या
रभ्य कृष्णपंचमीयावच्चंद्रः पूर्णतनुर्भवति ॥ तथा च यवनेश्वरः ॥
मासे तु शुक्लप्रतिपत्प्रवृत्ते पूर्णः शशी मध्यबलो दशाहे ॥ ५ ॥ ५

श्रेष्ठोऽतिदीप्तेऽल्पबलस्तु लीये सौम्यैस्तु दृष्टो बलवान्सदैवेति ॥ एवं पू
र्णतनुः शशांको होरायां लग्ने स्थितः होरेति लग्नस्याख्या उच्यते ॥ तत्र
स्वहोरायां स्थितः शशी जीवेन गुरुणा दृष्टो यदि वा सितेन शुक्रेण
दृष्टो भवति यदि वा व्यत्यये नियतो विकल्पः ॥ क्षिप्रं शीघ्रमेव नष्ट
स्यापहृतस्य द्रव्यादेर्लाभं करोति ॥ विदधाति ॥ लाभोपयातो ब
लवान् शुभश्चेति अथ वा शुभः सौम्यग्रहो बलवान्वीर्ययुतो ला
भे एकादशस्थाने गतः ॥ प्राप्तो भवति ॥ तदा शीघ्रात् क्षिप्रमेव न
ष्टस्य लाभं करोति ॥ इति ग्रहाणां स्थानदिक्चेष्टाकालबलं जा
तके प्रोक्तं बलवान् मित्रस्वगृहोच्चेषु तत आरभ्य स्वादिनादिषु शुभा

प्र.पं.च.

शुभाशुभेतरदंतेन ॥ अधुनारूतनष्टमुष्टिगचिंतितानां धातुमूल १०
६ जीवानां परिज्ञानमाह ॥ स्वांशे विलग्ने यदि वा त्रिकोणे स्वांशेस्थि
तः पश्यति धातुचिंतां ॥ परांशकस्थश्च करोति जीवं मूलं परांशो
पगतः परांशं ॥ ६ ॥ यः कश्चित् ग्रहस्तत्कालमात्मीयनवांशा
स्थितो विलग्ने तत्कालोदितं स्वांशं लग्नस्थे वा स्वात्मीयं नवांशकं
पश्यति ॥ आलोकयति ॥ तदा प्रष्टुः धातुचिंतां प्रवदेत् ॥ सुवर्णा
दिमृत्तिकांतं धातुद्रव्यं ॥ एतदुक्तं भवति ॥ स्वांशकस्थो ग्रहः
स्वांशकेन युक्तं लग्नं पश्यति तदा धातुचिंतां प्रवदेत् ॥ अथ लग्नगतं ६
स्वांशगं पश्यति तथापि धातुचिंतां प्रवदेदित्यर्थः ॥ ॥ ५ ॥ ॥

यतो लग्नपंचमनवमानामेकनवांशकस्तुल्यकाल्युदेति ॥ एतदुक्तं भवति ॥
स्वनवांशकस्थो ग्रहो लग्नपंचमनवमानां अन्यतमं स्वांशयुक्तं यदा पश्य
ति तदा धातुचिंतां प्रवदेदिति ॥ परांशकस्थश्च करोति जीवमिति ॥ यःत
त्रापि धाम्याधाम्यपरिविभागो ग्रहांशवशाद्वाच्यः ॥ पापग्रहांशकमव
स्थितस्याधाम्यं सौम्यग्रहांशकमवस्थितस्य धाम्यमिति ॥ परांशकस्थ
श्च करोति जीवमिति ॥ यः कश्चिद्ग्रहः परनवांशकस्थो अन्यग्रहनव
भागावस्थितः ॥ विलग्नगतं स्वांशं पश्यति ॥ त्रिकोणयोरन्यतमगतं वा प
श्यति ॥ तदा जीवं करोति जीवचिंतां प्रवदेत् ॥ पुरुषादिसरीसृपांतं जी
वः ॥ लग्नापि ग्रहयुक्तेन वांशकवशात् द्विपदचतुष्पदसरीसृपादिविभागाः ॥

सं॰पं॰का॰ ७

टी॰का॰

मिथुनकन्यातुलाधन्विवर्द्धिकुंभाद्विपदाः ॥ देवेनरीः पक्षिणश्चद्विपदास्तथा ॥
मेषवृश्चिकसिंहधन्व्यपरार्द्धाश्चतुष्पदाः ॥ कर्कटवृश्चिकमकरमीनाः
सरीसृपाः ॥ तत्रमीनोद्धुपदः ॥ अन्येबहुपदाः मूलपरांशोपगतः परांशाभि
ति ॥ मूलाचिंतांप्रवदेत् ॥ यः कर्कटपरांशोपगतोऽन्यपहनवांशसम
वास्थितोविलग्नगतंपरनवांशकेत्रिकोणयोरन्यतमगतंवापश्यति ॥
तदामूलंकरोति ॥ मूलेचिंतांप्रवदेत् ॥ एतच्चप्रायःसंभवति ॥ तत्रा
तिबलग्रहदर्शनात्ज्ञेयं ॥ वृक्षादितृणांतंमूलं ॥ तत्रापिग्रहयुक्तन
वांशकवशात्स्थलजलजत्वंज्ञेयं ॥ कर्कटमकरमीनाजलजाः ॥ अन्य
स्थदेवस्थलजाइति ॥ तथाचोक्तंतासिद्धप्रश्नज्ञानेउक्तं ॥ स्वांशा

स्थितोविलग्नेयदाग्रहःस्वांशकंनिरीक्षेत् ॥ धातोरुक्तदातुचिंतांकरोति ॥ पर
स्थितोजीवं ॥ परभागसंनिविष्टः ॥ परांशके प्राग्विलग्नमायातं ॥ पश्यतिमू
लप्रवदेदेवनवयंचमेतेयामिति ॥ एतदेवपुनरपिप्रकारांतरेणाह ॥ धातु
मूलंजीवमित्योजराशौ युग्मेविपर्यादेतदेवप्रतीपंतं ॥ लग्नेयांशास्त
क्रमाद्गुणयेमेवंसंक्षेपंविस्तरात्तस्यभेदः ॥ ७ ॥ ६ ॥ मेषमिथुनसिंह
तुलाधन्विकुंभाओजराशयः ॥ वृषकर्कटकन्यावृश्चिकमकरमीनायु
ग्मराशयः ॥ तत्रौजेविषमराशौलग्नगतेप्रथमनवांशकोदयेधातु
चिंतांप्रवदेत् ॥ द्वितीयेमूलं ॥ तृतीयेजीवं ॥ पुनश्चतुर्थेधातुं ॥ ष
ष्ठेजीवं ॥ सप्तमेधातुं ॥ अष्टमेमूलं ॥ नवमेजीवमिति ॥ युग्मेविपर्या
देतदेवप्रतीपमिति ॥ युग्मेयुग्मराशौलग्नगतेनवांशकक्रमेणैवतद

षट्पंचा० ८ वृषवर्गोक्तं प्रतीपं विपर्ययेण विंद्यात् जानीयात् ॥ तेन प्रथमनवांशकोदये जी टी०का०
वं ॥ द्वितीये मूलं ॥ तृतीये धातुं ॥ पुनश्चतुर्थे जीवं ॥ पंचमे मूलं ॥ षष्ठे धातुं ॥
पुनः सप्तमे जीवं ॥ अष्टमे मूलं ॥ नवमे धातुमिति ॥ एवमनेन प्रकारेण
क्रमात्परिपाटितः ॥ कोनेन विलग्नयोगशोचनवमभागस्य कालमुदितः ॥
स यादृग्वेगणनीयः ॥ स च लग्ननवांशकवशात् ज्ञेय एवानि विभागः ॥
केचित्पृष्ठाणात्रये धातुमूलजीवमिश्राजरात्रो युग्मे विंद्यादतद्दव प्रती
पमिश्रिवर्णत्रये ॥ अयं संक्षेपः ॥ समासमुक्तः ॥ विस्तारात् व्यासेनास्य वा
र्थस्य प्रपंचः ॥ स्पष्टता अभिप्रायत इति ॥ इति श्रीभट्टोत्पलविरचितायां
षट्पंचाशिकाविवृतौ संक्षेपाख्यो होराध्यायः ॥ ५ ॥ प्रथमः ॥
इदानीं गमागमाध्यायो व्याख्यायते ॥ तत्रादावेव स्थानगमागम ८

ने२ पि२ को२

जीवितमरणयोर्वागतिप्रश्नेश्वभवतामौनुंह ॥ ५ ॥ वृषसिंहवृश्चिकघटे
विद्धि स्थानं गमागमौ न स्तः ॥ नष्टं तेषां न नष्टं न रोगं नात्ति नेचाभिभवः ॥ ८ ॥
तद्विपरीतेषु चरेषु द्विशरीरे मिश्रितं फलं वाच्यं ॥ लग्ने ह्योर्वे व्यंशुभ दृष्ट्वा
रोगभनमतोन्यत्र ॥ ९ ॥ वृषसिंहवृश्चिकाः प्रसिद्धाः ॥ घटः कुंभः ॥ एते
स्थिरराशयः ॥ एतेषु वृषसिंहवृश्चिकघटेषु ॥ एतेषामन्यतमे लग्नं प्राप्ते
स्थानं विद्धि ॥ जानीहि ॥ प्रष्टुः स्थानलाभो भवति ॥ गमागमौ न स्तः गमश्च आ
गमश्च गमागमौ तौ द्वौ अपि न स्तः ॥ न मृतं न मृतं मरणं न भवति ॥ जी
वसेव ॥ न चापि नष्टं धातु द्रव्यं धनं अदर्शनपथिनष्टं न नाशं प्राप्नुं ॥
अथवा विदेशात् स्थानरस्तस्मात् स्थानात् न नष्टः अन्यदेशांतरं गतः ने रोगाः
तिः रोगो ज्वरादिस्तस्य शांतिः शमनं व्याध्यभिभवस्तस्य न भवति ॥

प्र.प्रे.व्या.

टीका

तत्राभिभवः॥ पराजयः शत्रोः सकाशात् भवति ॥ तद्विपरीतं तु चरैरिति॥ चराः
मेषकर्कटतुलामकराः तदिसनेनानंतरोक्तं वृद्धिस्थानमित्यादिकं सर्वं प्रसव
म्पस्यते ॥ चरराशिधाने एछालग्नस्थे तत्फलं अनंतरोक्तं विपरीतं विपर्य
याद्भवति ॥ पूर्वमुक्तं वृद्धिस्थानमिति तच्चरैः स्थानप्राप्तिर्नास्तीति वाच्यं
गमागमौ नस्त इति पूर्वमुक्तं चरे गमागमौ विचलौ ॥ पूर्वमुक्तं नष्टतः चुरेष्ट
नष्टमिति वाच्यं ॥ पूर्वमुक्तं न चापि नष्टं ॥ चरे नष्टमिति वाच्यं ॥ पूर्वोक्तं न रोग
शांतिः चरे रोगशांतिर्भवतीति वाच्यं ॥ पूर्वमुक्तं न चाभिभवः ॥ चरैरभि
भवो भवतीति वक्तव्यं ॥ द्विशरीरैर्मिश्रं फलं भवतीति ॥ द्विशरीराः
द्विस्वभावाः ॥ मिथुनकन्याधन्विमीनाः तेः एछालग्ने मिश्रितं फलं भव
ति ॥ यत्स्थिरेरुक्तं यच्च चरेरुक्तं तन्मिश्रितमुभयं फलं भवति ॥ ५

भवति न भवतीति वा सर्वमेतत्तु यथोद्दिष्टं ॥ तत्रायं निश्चयः द्विःस्वभावल
ग्नप्रथमेर्द्धे स्थिरवत्फलं सर्वं वदेत् ॥ द्वितीये चरवत् ॥ यतस्तस्य प्रथमार्द्धं
स्थिरसमीपवर्ति द्वितीयं चरसमीपवर्त्तीति ॥ तथा चास्मदीये प्रश्नज्ञाने ॥
स्थिरराशौ यैल ग्नगते स्थानप्राप्तिं वदेत् न्याशगमनं च ॥ रोगोपशमो नाशो द्र
व्याणां स्यात् सराभावो नात्र चरराशौ विपरीतं मिश्रं वाच्यं द्विमूर्त्युदये ॥ स्थि
रवत् प्रथमेर्द्धे स्यात् परे चरराशिवत् सर्वमिति ॥ लग्नं द्विविधं वक्तव्यमिति ॥
लग्नं प्रश्नलग्नं इंदुश्चंद्रः ॥ तयोर्लग्नेन्द्वोः द्वयोरपि शुभदृष्ट्या सौम्य
ग्रहदर्शनेन शोभनं फलं वक्तव्यं ॥ लग्नेन्द्वोः सौम्यदृष्टि संपर्के ॥ अत
न्यां हि लि ॥ अतोस्मादुक्ताद्विपरीते न्यदशुभं वक्तव्यं ॥ तेन लग्नेन्द्व
पापदृष्टौ यदि भवतस्तदा सर्वं एछास्ये दौ भवनं वक्तव्यं ॥ ५ ॥

पं॰चा॰ १० टी॰का॰

अर्थाद्देवोकस्मिन्नुभयदृष्टमध्यमफलंभवति ॥ अथपुनःशत्रोरागमनि
वृत्तिज्ञानमाह ॥ मूलशत्रुगतैःपापैःशत्रुर्मार्गान्निवर्तते ॥ चतुर्थगै
रपिप्राप्तःशत्रुर्भग्नोनिवर्तते ॥१०॥ सुतस्थानंपंचमंरिपुःशत्रुःरिपु
मार्गान्मध्येनिवर्ततेगच्छति ॥ तैरेवपापैःलग्नात्चतुर्थस्थानेसमव
स्थितैः अपिशब्दःसंभावनायां ॥ प्राप्तोपिशत्रुर्निकटस्थोभग्नःपरा
जितोनिवर्त्तते ॥ प्रतीपंगच्छतीत्यर्थः ॥ अन्यथायोगांतरमाह ॥
पा मौलिकुंभककर्कटाख्यास्तुलेयदास्थिताः ॥ रिपोःपराजयस्तदाचैष्य तु
दःपलायनं ॥११॥ झषमीनालिवृश्चिकःकुंभककर्कटाप्रसिद्धा ॥
एतेरसातलं ॥ लग्नाच्चतुर्थस्थानेस्थितः ॥ एतेषामन्यतमःप्रश्न १०
लग्नाच्चतुर्थस्थानेयदासमवस्थितोभवतितदारिपोःशत्रोःपलायनंप

श्चादपसर्पणंभवतीत्यर्थः ॥ अथयायिनांशुभाशुभज्ञानमाह ॥ चरोदये
शुभेस्थितःशुभंकरोतियायिनां ॥ अशोभनैरशोभनंस्थिरोदयेपिवाशु
भं ॥१२॥ चरोदयेचरराशौदृष्टमतास्मिन्शुभग्रहाणांबुधजीवशुक्राणामन्य
तमःस्थितश्चेत्तदातेषामवयायिनामशोभनमश्रेयःकरोति ॥ स्थिरो
दयेपिवाशुभेस्थिरराणामन्यतमस्योदयेतस्मिन्भूयायसंयुक्तेवाविक
ल्पेनशुभंभवति ॥ तत्स्थानंपापग्रहस्यस्वक्षेत्रोच्चं ॥ मूलत्रिकोणं ॥
मित्रक्षेत्रंभवतितदाशुभं ॥ अन्यदाशुभमित्यर्थः ॥ केचित्तुस्थिरेदृष्टम
चेवाशुभमितिपठंति ॥ लग्नादृष्टमेपापसंयुक्तेवाशुभंप्राग्वदिति ॥
अथपुनःशत्रोरपिगमनागमनार्थमाह ॥ स्थिरेचारिदेवचरोदयेनचागमो
रिपोर्यदा ॥ तदागमोरिपोर्वदेद्विपर्ययेविपर्ययं ॥१३॥ स्थिरास्थि

ररशेरात्रौ श्चंद्रोभवति ॥चरोदयेचररात्रौलग्नगतेप्रश्नकालेयदारि
पोः शत्रोःनचागमनः॥आगमोनेष्टुप्यते ॥तदातस्मिन्रिपोःशत्रोरागमनंव
देत् ॥स्थिरराशिगतेचंद्रेचरलग्नोदयेतन्नवांशके त्रीष्ट्रसबलोरिपुः
समायाति ॥विपर्ययेत्वन्यथावाच्यं ॥चरेचराशिनि स्थितेस्थिरराशौ
लग्नगतेयदिरिपोरागमनंष्टुच्छ्यतेतदातस्मिन्प्रश्नेनागच्छतीतिवदे
दित्यर्थः॥द्विस्वभावेराशौलग्नगतेद्विस्वभावगतेवाराशिनिवि
पर्ययं ॥शत्रोर्नारगमनंवदेत् ॥अधुनाशत्रोरभिवृत्तितानमाह॥
स्थिरेतुलग्नमागतेद्विरात्मकेतुचंद्रमाः॥निवृत्ततेरिपुस्तदासु
हृत्समागतोपिसन् ॥१४॥स्थिरराशौलग्नसमागतेलग्नंप्राप्तेद्विरा ११
त्मकेद्विस्वभावराशौ शशिभवति ॥तदारिपुःशत्रुःसुहृत्मागतोपि

सन् अतिशयेनदूरंसुदूरंस्वस्थानात्सुहृत्समागतःसंप्राप्तोपिनिवर्ततेप्रती
पंगच्छति ॥अपिशब्दःसंभावनायां॥अन्योयोगांतरमाह॥चरेद्विलग्नग
तेद्विदेहःपथार्धमागत्यनिवर्ततेरिपुः॥विपर्ययेचागमनंद्विधास्यात्स्वरा
जयस्यादशुभेक्षितेच ॥१५॥चरेचरराशौशशिचंद्रमाभवति ॥तदालग्न
गतःप्रश्नस्थोद्विदेहोद्विस्वभावोराशिर्यदायस्मिन्कालेतदापथार्धमागत्या
र्धंदलमागत्यप्राप्यनिवर्तते ॥प्रतीपंगच्छति ॥तुशब्दोवधारणेविपर्यय
इति ॥विपरीतेशत्रोरागमनंद्विधास्यात् ॥प्रकारद्वयेनभवेत् ॥एत
दुक्तंभवति॥द्विस्वभावराशौचंद्रेशशिनि ।चरराशौलग्नगतेशत्रोरागमनं
दलद्वयेनभवति ॥पराजयःस्यादशुभेक्षितेति ॥तस्मिन्नेवविपर्ययो
गेचंद्रेलग्नेवाशुभेक्षितेपापसंदृष्टेशत्रोःसकाशात्स्वेषुःपराजयो

१२ क्षिप्रवः स्यात् ॥ एतदुक्तं भवति ॥ द्विस्वभावराशिस्थे ज्ञाचिनि चरराशौ लग्न
गते द्वयोरपि पापग्रहयोः शत्रोरागमनं द्विधा भवति ॥ समागतस्य प
जयं करोतीत्यर्थः ॥ अथान्ययोगांतरमाह ॥ अर्कार्किज्ञसितानां मध्ये कोपि
चरोदये यदा भवति ॥ पूर्ववत्तदा शत्रुगमनं वक्रगते नेति वक्तव्यं ॥ अर्कः
सूर्यः ॥ आर्किः शनिः ॥ ज्ञो बुधः ॥ सितः शुक्रः एषां मध्ये एकोपि ग्रहो
यदा चरोदये चरराशौ भवति ॥ वक्रगतिं च समाश्रितो भवति ॥ तदा
शत्रोरागमनं नेति वक्तव्यं ॥ शत्रुर्नागच्छतीत्यर्थः ॥ अथान्ययोगां
तरमाह ॥ स्थिरोदये जीवशनैश्चरेक्षिते गमागमौ न वदेत्तु एव तौ ॥ व ४
त्रिपंचषष्ठारिपुसंगमाय पापाश्च तथा विनिवर्तनाय ॥ १७ ॥ स्थिरोदये १२
स्थिरराशौ लग्नगते तस्मिन् शनैश्चरेक्षिते सौराभ्यां दृष्टे एव ततः प्रष्टुः गमाग
मौ न वदेत् ॥ गमनागमनं न भवत इत्यर्थः ॥ तस्मिन्नेव स्थिरोदये जी

वशनैश्चरेक्षिते पापाः पापग्रहाः त्रिपंचषष्ठाश्च तृतीयपंचमषष्ठस्था
नस्था यदा भवंति ॥ तदा रिपोः शत्रोः संगमाय संयोगाय भवंति ॥ प्रष्टुः श
त्रुणा सह युद्धं भवतीत्यर्थः ॥ अस्मिन्नेवएके चेत्पापाः ॥ अशुभग्रहाः
चतुर्थस्थानस्थाः ॥ अस्य च शत्रोर्विनिवर्तनाय ॥ प्रतीपगमनाय भव
ति ॥ शत्रुर्विनिवर्तत इत्यर्थः ॥ अन्यथा गमागमनाययोगांतरमाह ॥
नागच्छति परचक्रं यदार्कचंद्रौ चतुर्थे भुवनस्थौ ॥ गुरुबुधशुक्रो हि
बुके यदा तदा शीघ्रमायाति ॥ १८ ॥ रविचंद्रौ यदा यस्मिन्काले लग्ना
च्चतुर्थस्थानगतौ भवतस्तदा परचक्रं नागच्छति नायाति ॥ अथ गुरुबु
धशुक्रा हिबुके चतुर्थस्थाने भवंति यदा तदा परचक्रं शीघ्रमाया
ति ॥ आगच्छतीत्यर्थः ॥ अन्यथान्ययोगांतरमाह ॥ मेषधनुःसिंह

वृषायधुरुदयस्थाभवतिहिबुकेवा॥रात्रोर्विनिवर्त्तकास्तेग्रहसहितावा
वियुक्तावा॥१९॥एतेषांमेषधनुःसिंहवृषाणांयथैकतमउदयस्था
स्तत्काललग्नगतोभवति॥अथवातत्कालिकलग्नाच्चतुर्थस्थानए
तेषांमध्यदन्यतमोभवति॥तेचग्रहैर्युक्ताः॥सहितावावियुक्ताविर
हिताभवंति॥तदातस्मिन्कालेरात्रोर्विनिवर्त्तते प्रतीपंयाति॥
अथान्यरात्रोर्नारेगमनार्थंयोगांतरमाह॥२०॥स्थिरराशौयुदुदये
चारिर्गुरुर्वास्थितस्तदाचान्तु॥उदयेरविर्गुरुर्वाचरराशौस्यात्
दागमनं॥२०॥उदयेतत्काललग्नेस्थिरलग्नेवचानिजवावाभवति॥
तदारिपुःस्थितःस्वस्थानान्नचलितःतत्रैवतिष्ठति॥अथचरराशौ
उदयगतेलग्नेरवौगुरुर्वाभवति॥तदारात्रोरागमनंस्यादुक्तं॥ १७

५८

अथयातुर्निवृत्तिज्ञानार्थंयोगमाह॥ग्रहःसर्वोत्तमबलोलग्नाद्यस्मिन्ग्र
हेस्थितः॥मासैस्ततुल्यसंख्याकैर्निवृत्तिंयातुरादिशेत्॥२१॥२१॥
चरांशास्थेग्रहेतस्मिन्कालमेतंविनिर्दिशेत्॥द्विगुणंस्थिरभागस्थंत्रि
गुणंद्व्यात्मकांशके॥२२॥प्रश्नलग्नाद्यस्मिन्ग्रहेयावत्तमेस्थानेसर्वो
त्तमबलोग्रहः॥स्थितोभवतितत्तुल्यसंख्याकैर्मासैर्यातुर्जिगमिषोःप्र
वासान्निवर्त्तनंनिर्दिशेत्॥चरांशस्थइति॥तस्मिन्सर्वोत्तमबलेग्रहे
तमेवकालंद्विगुणंवदेत्॥द्विस्वभावांशकस्थेसर्वोत्तमबलग्रहेतमेव
कालंत्रिगुणंवदेदिति॥स्थिरनवांशस्थेसर्वोत्तमबलेग्रहेतमेवकालं
द्विवदेत्॥अत्रैवमतांतरमाह॥यातुर्विलग्नजामित्रौभवेनाधिपतिर्य
दा॥करोतिवक्रमावृत्तेःकालंतद्वतपरे॥२३॥विलग्नंप्रश्नलग्न

प्र॰यं॰व्या॰ १४

तस्मात्‌ जामित्रं ॥ सप्तमं तदधिपतिर्यदधिपतिर्यदा यस्मिन्काले वक्रितं का टीका॰
लं यावत्‌ जिगमिषोः प्रवासस्ततः परं आचार्याः कश्यपादयः कथयंति ॥ वक्रं येय्य
हणं यथासंभवं योज्यं ॥ तथा च यात्रायां चललग्नात्‌ सप्तमलग्नाधिपो यदि वक्री
भवति तदा वक्तव्यः ॥ प्रवासिनिवृत्तये कालः ॥ अधुना यात्रारामगेन प्रथमा
गमदिने ज्ञानमाह ॥ ४ ॥ उदयर्क्षाच्चंद्रर्क्षं प्राप्नोति यावद्भिर्दिनैः सुतावद्भिः ॥
आगमनं स्याद्यात्रायां दिमध्येन ग्रहः कश्चित्‌ ॥ २४ ॥ उदयर्क्षं उदयलग्नं
उदयलग्नं चंद्रर्क्षं नं दूरा त्रिः प्रश्नकाले यच्चंद्रमा स्थितः उदयर्क्षाच्चं
द्रर्क्षं यावत्‌ संख्याकं भवति तावत्संख्याके दिने रतिते यात्रागमनं
स्यान्नत्वा वेत्‌ ॥ यदि मध्येन ग्रहः कश्चिन्न यो लग्नचंद्रांतरयोर्यदि
कश्चिद्ग्रहो न भवति ॥ तदेवं ग्रहसंभवे यात्रा न भवत्यपमेव नायात्रीयपः ॥ १४
४ ॥ इति यात्रागमनागमनोध्यायो द्वितीयः ॥ ४ ॥ अथ जयपराजयौ

ध्यायो व्याख्यायते ॥ तत्रादावेव जयपराजयज्ञानमाह ॥ ४ ॥ दशमोदयसप्त
मगाः सौम्या नगराधिपस्य विजयकराः ॥ आक्रांतं जगुरुतोपाप्ये [illegible] दा वि मि
जयदा नवमे ॥ २५ ॥ प्राग्लग्नसप्तमदशमेषु सौम्याः सा मस्थिताः नगरा
धिपस्य विपक्षोषेण जयं कुर्वंति ॥ भौमः सौलग्नात्‌ सप्तमे स्थितो प्रथुः प्रकर्ष
णासंयोगं पलायनं दत्तः ॥ तथा बुधजीवशुक्राः नमस्थविशेषेण जयं दद
ति ॥ प्रथुर्जयो भवती सूर्यः ॥ अथ नागरयायिनोः कस्य जयो भवतीय
लं सदृशज्ञानमाह ॥ ४ ॥ पौरास्तृतीयभवनाद्भमी क्रायायिनः शुभेः शुभ
दाः ॥ व्ययदशमायपापाः पुरस्य नेष्टा शुभायातुः ॥ २६ ॥ नागरस्य प्रक्रा
लग्नात्‌ तृतीयभवनाद्‌ द्वितीयं अष्टमेया वस्तौराजेयाः ॥ नवमाद्विती
येयावत्‌ यायिनो ह्येयाः ॥ यन्नाहौ यात्रायां मूर्धाम सयायि येन पश्चात्‌ सेन
गरः ॥ उक्तं च ॥ आदावुघमिनो यो यात्रायायिनास्ता न्विभिंतयेत्‌ ॥ ४ ॥

येषांपश्चात्समुद्योगोनागरान्विद्धितानपि ॥ बाद्राब्दोत्र नार्थ ज्ञेयः ॥ एतेरा
त्र्यायः शुभग्रहयुक्ताः शुभदाः स्वल्पपतेश्च्युंदधाति ॥ अथोदेवयस्यपा
पे संयुक्तास्तस्य राज्ञयकराः ॥ तथा च लल्लेनोक्तं ॥ नवमाद्येचक्रदले या
यिनो नागरस्य लीयादौ ॥ पौराः विजयः सौम्ययुतेस्याद्रणाक्रूरे युते भं
गः ॥ तथाचास्मदीये प्रश्नज्ञाने ॥ नवमाद्येचक्रदले विहितेयायिनस्तल्ली
यादौ ॥ शुभसंयुक्तेभागे विजयोऽपरेभंगः ॥ इति अथोदेवद्वयेपि
पापसौम्यमिश्रे युक्ते व्यामिश्रं फलं वक्तव्यं ॥ नतु तयोर्नृपराज्ञयइति
ए चालग्नाद्व्यद्दशमाय ॥ असमाहारेएकवद्भावः ॥ व्ययदशमाय
षु पापायदामूर्वास्थिताश्चबूंति ॥ तद्वापुरस्यानेष्टः ॥ यातुः शुभाउपल
यकाराइत्यर्थः ॥ अ संधिरोधं नार्थमन्यद्योगांतरमाह ॥ २६ ॥ १५
न राशिसंस्था द्युदये शुभाख्याःपापास्तु संस्थायदाभवंति ॥ २६ ॥

तुणा.

तदासुसंधिं प्रवदन्तिपापैर्हिदेहोपगतेर्विरोधं ॥ २७ ॥ न्तरान्त्यायः मिथुनक
न्यातुलकुंभाः शुभाः सौम्याः बुधबृहस्पतिशुक्रपूर्णचन्द्राः ॥ एतेन्तराशौ
प्राग्लग्ने स्थिताः भवेयुः ॥ अथ वेतएवचन्द्रराशौ व्ययायसंस्थाश्चभवन्ति ॥
तदातस्मिन्कालेक्षिप्रमेवनृपाणां राज्ञांसंधानं प्रवदेत् ॥ अथान्यद्योगां
तरमाह ॥ केन्द्रोपगताः सौम्याः सौम्यदृष्टा न्तलग्नगाः प्रीतिं ॥ कुर्वंतिपा
पदृष्टाः पापास्तेविपरीतं ॥ २८ ॥ केन्द्रेषुसौम्याः समवस्थिताः अथवातए
वसौम्याः न्तलग्नगाः न्तराशिषुप्रागुक्तेषुस्थिताः सौम्यैश्चग्रहैश्चदृष्टाः
परस्परमवलोकिता इत्यर्थः ॥ एवंविधाः संधिं कुर्वंति ॥ न चैव केन्द्रेषुपा
पाः समवस्थिताश्चपापदृष्टाः परस्परपापैरवलोकिताविपर्ययमप्रीतिंकु
र्वंति विग्रहं कुर्वंतीत्यर्थः ॥ अथ सेनागमनज्ञानमाह ॥ द्वितीयेवात्ततीयेवा
पुरः शुक्रोयदातथा ॥ आम्बेवागमनेतस्य प्रवासी वानसंशयः ॥ २९ ॥

द्वा नदी नौ

प्रश्नलग्नाद्यदा द्वितीयस्थाने तृतीये यथा तथा गुरुशुक्रौ येन केन प्रका
५ रेण भवतः ॥ तदा सेनाचक्रं आशु क्षिप्रमेव गच्छति ॥ प्रवासी विदेशस्थो
वा क्षिप्रमेव याति ॥ यथा तथा ग्रहणमुक्तं मा विवक्षार्थं ॥ कदाचित्तु
द्वे वा द्वितीये तृतीये वा एको द्वितीये परस्तृतीये वेति ॥ ५ ॥ इति श्रीति
जयपराजयाध्यायः ॥ ३ ॥ अधुना शुभाशुभफलं नामाध्यायो व्या
ख्यायते ॥ ५ ॥ तत्रादावेव शुभाशुभज्ञानमाह ॥ ६ ॥ केंद्रत्रिको
णेषु शुभास्थितेषु पापेषु केंद्राष्टमवर्जितेषु ॥ सर्वार्थसिद्धिं प्रवद
न्त्य पाणां विपर्ययस्थे च विपर्ययः स्यात् ॥ ३० ॥ अन्वयो यदा पा
पाः केंद्रत्रिकोणाष्टमेषु भवंति ॥ सौम्याः केंद्रत्रिकोणवर्ज्यमन्यत्र १५
भवंति तदा विपरीतं शुभमिदं ॥ अधुना [illegible] लाभालाभज्ञानमा
ह ॥ त्रिपंचलाभास्तमयेषु सौम्या लाभप्रदा नेष्टफला च पापाः ॥

तुलाथ कन्या मिथुनं घटश्च नराशयस्तेषु शुभं वदंति ॥ ३१ ॥ अलाभयोग
योग्ये लाभः ॥ विपरीते लाभनाशः ॥ तथा तुला कुंभा मिथुन कन्याः पुरुष
राशयः ॥ एतेषु लग्नेषु शुभग्रहाधिष्ठितेषु मुनयः शुभं वदंति ॥ शुभं शु
भं ॥ अथान्ययोगांतरमाह ॥ स्थानप्रदा दशमसप्तमगाश्च सौम्याः
मानार्थदाः स्वसुतलग्नगताः भवंति ॥ पापोव्ययाय सहितान शुभप्र
दास्युः लग्ने शशीन शुभदो दशमे शुभश्च ॥ ३२ ॥ दशमसप्तमगाः
सौम्याः स्थानलाभं वदंति ॥ तमेवा [illegible] द्वितीयपंचमगता मानार्थदा
भवंति ॥ पापा द्वादशैकादशस्था अशुभदाः ॥ लग्ने शशी न शुभदो
हति ॥ पापदाति अनुवर्तते चंद्रः ॥ पापरूपः एव लग्ने स्थितो न शु
भदः ॥ स एव दशमे पापरूपोपि शुभदः ॥ श्रेयस्करो भवतीत्यर्थः ॥

प्र.पं.चा.
१९

अथान्यत् शुभाशुभज्ञानमाह ॥ इंदुः द्विसप्तदशमायारिपुत्रिसंस्थः ॥ टी.का.
पश्येद्गुरुः शुभफलं प्रमदाकुलं स्यात् ॥ लग्नात्त्रिधर्मसुतनैधनगा
स्तु पापाः कार्यार्थ[illegible]ः नाशभयदाः शुभदाः शुभाश्च ॥ २३ ॥
अत्र द्विसप्तदशमादिषु संस्थितं चंद्रं गुरुर्ज्ञश्चेद्यदा पश्यति तदा पृच्छ-
स्थिरहेतुकं शुभफलं स्त्रीलाभादिकं भवेत् ॥ प्राग्लग्नात्तृतीयनवमपंच
माष्टमगताः पापाः पृच्छकार्यार्थनाशभयदाः स्युः कार्यस्य कर्तु
स्य अर्थस्य धनस्य च नाशं कुर्वंति ॥ भयं च ददति ॥ शुभदाः शु
भाश्च ॥ पुनरेतेषु लग्नादिस्थानेषु सौम्याः शुभं ददतीति ॥ १९
अधुनागतस्य शुभाशुभज्ञानमाह ॥ शुभग्रहाः सौम्य
निरीक्षिताश्च विलग्नसप्तमपंचमस्थाः ॥ त्रिषड्दशा

येषु निशाकरः स्याच्छुभं वदेद्रोगनिपीडितानां ॥ २४ ॥ सौम्यग्रहा विलग्नसप्तम
पंचमस्थाः यथासंभवंति ॥ तेन सौम्यनिरीक्षिताः शुभग्रहैर्दृष्टाः ॥ एतदुक्तं
भवति ॥ शुभग्रहा उक्तस्थानस्थाः परस्परं पश्यंति ॥ यदा तदेष योगः केवलो यावच्चं
द्रमास्त्रिषड्दशायेषु भवेत् तावदेवायं योगः ॥ अत्र व्याधिपीडितानां शुभमारोग्यं वद
त् ॥ योगे संपूर्णे शुभं ब्रूयादिति ॥ २४ ॥ इति श्री० ॥ शुभाशुभलक्षणाध्यायः ॥ ४ ॥
चतुर्थः ॥ ४ ॥ अथ प्रवासचिंताध्यायो व्याख्यायते ॥ तत्रादावेव गमागमज्ञानार्थं
योगमाह ॥ दूरगतस्यागमनं सुतधनसहजस्थितैर्ग्रहैर्लग्नात् ॥ सौम्यैर्नष्टप्राप्ति
र्लाभागमनं गुरुसिताभ्यां ॥ २५ ॥ सौम्यग्रहैर्लग्नात्सुतधनसहजस्थितैर्नष्ट
स्य दूरगतस्य प्राप्तिरागमनं वदेत् ॥ चिरकालप्रवासिनो लाभो वाच्य इति ॥ त
था गुरुसिताभ्यामेव स्थानेषु स्थिताभ्यां गुरु अल्पकालेन प्रवासिन आगमनं
वदेत् ॥ अथान्यद्योगांतरमाह ॥ जामित्रे वाथवा षष्ठे ग्रहः केंद्रेऽथवाक्पतिः ॥ प्रो

प्र॰ चा॰ पितागमनं विंद्यात् त्रिकोणगे सितेपि वा ॥ २५ ॥ षष्ठात्लग्नात् सप्तमेऽष्टमे वा यः कश्चि टी॰ का॰
१८ त्ग्रहः स्थितो भवति ॥ तथा केंद्रे वृहस्पतिर्भवति तदा प्रवासिनं आगमनं जानी
यात् ॥ बुधे शुक्रे वा त्रिकोणयोरन्यतमस्थे गुरौ वा त्रिकोणस्थयोः प्रोषितागमनं
विंद्यादिति ॥ अन्ययोगांतरमाह ॥ अष्टमस्थे निशानाथे केंद्रे क्रूरपापवर्जिते ॥
प्रवासी सुखमायाति सौम्ये लाभसमन्विते ॥ २७ ॥ चंद्रेऽष्टमस्थानस्थे केंद्रैः
पापग्रहवर्जितैः प्रवासी पथिकः सुखेन समागच्छति ॥ सौम्यैः केंद्रस्थितैः प्रवा
सी लाभसमन्वितः सुखमायाति ॥ अन्ययोगांतरमाह ॥ पृष्ठोदयपापनिरीक्षि
ते वा पापास्तनीचरिपुकेंद्रभावा ॥ सौम्यैरदृष्टा वधबंधदाः स्युर्नष्टा विनष्टा
मुषितास्तु वाच्याः ॥ २८ ॥ मेषवृषकर्किधन्विमकरमीनाः पृष्ठोदयाः एतेषां मध्ये
एकतमे लग्नगते च पापावलोकिते ॥ वा शब्दश्चार्थे ॥ एवंविधे योगे प्रवासिन
स्ताडनं बंधनं वा वदेत् ॥ अथवा पापाः सर्वे एव अस्तनीचे स्थिताः ते च शत्रुविलो १८
किताः केंद्रे वा स्थिता प्रवासिनो नष्टाः ॥ तस्मात्स्थानादन्यदेशांतरं गताः ॥

अथवा लग्नात् षष्ठे स्थाने वा स्थितास्ते च शुभैर्न दृष्टाः ॥ न विलोकिताः तथा केंद्रे वा स्थि
ताः तत्र च सौम्यैर्नष्टास्तदा प्रवासिनो मुषिताश्चौरैरपहृताः स्थानाच्च भवेयुः ॥ वा श
ब्दो विकल्पार्थः ॥ वधबंधदाः स्युरिति पापानां विशेषणं ॥ अधुना प्रवासिना आगम
ने कालज्ञानमाह ॥ ५ ॥ यो ग्रहो विलग्नाच्युतमे गृहे तु तेनाहता द्वादशराशयः स्युः ॥ ताव
द्दिनाद्यागमनस्य विंद्यान्निवर्तनं वक्रगते ग्रहे स्युः ॥ २९ ॥ विलग्नाद्यावत्संख्यराशौ
यः कश्चिद्ग्रहः स्थितः स च स्पष्टगतिः तेन तत्प्रमाणेन द्वादशराशय आहता गुणि
ताः कार्याः ॥ एतदुक्तं भवति ॥ द्वादशसंख्यमंकं स्थापयित्वा लग्नात् यावति गृहांतर
राशिसंख्यया गुणयेत् ॥ तत्र या संख्या भवति तावत्संख्यानि दिनानि प्रवासिन आ
गमनस्य विंद्यात् जानीयात् ॥ तावद्भिर्दिनैः पथिक आगच्छतीत्यर्थः ॥ निवर्तनं व
क्रगते ग्रहे स्युः ॥ अथ स ग्रहो वक्री प्रतीपगतिः भवति यदा तदा तावत्संख्यैर्दिनैः
प्रवासान्निवर्तनं भवति ॥ ५ ॥ इति श्री प्रवसचिंतानाम पंचमोध्यायः ॥ ५ ॥

ष.पंचा. अथ प्रा श्नाध्यायो व्याख्यायते ॥४९॥ तत्रादावेव चौरज्ञानमाह ॥ स्थिरोदये स्थिरांशे वा वर्गोत्तमगतेपि वा ॥ स्थितं तत्रैव तद्द्रव्यं स्वकीयेनैव चोरितं ॥५०॥ स्थिरो
१९ दये स्थिरलग्ने ॥ अन्यापरेणापहृतं तस्मात् स्थानाच्चालितमिति ॥ अधुना स्थानज्ञा
नमाह ॥ आदिमध्यावसानेषु द्रेष्काणेषु विलग्नतः ॥ द्वारदेशे तथा मध्ये गृहां
ते च वदेद्धनं ॥५१॥ प्राग्लग्नस्य द्रेष्काणगृहांते प्रथमद्रेष्काणोदये हृतं धनं
तत्र द्वारदेशे स्थितं वदेत् ॥ द्वितीयद्रेष्काणोदये गृहमध्ये स्थाने वदेत् ॥
एवं तृतीये द्रेष्काणे गृहांते वक्रमपाश्चिमभागे ब्रूयादिति ॥ अधुना लाभालाभ
ज्ञानमाह ॥ पूर्णः शशी लग्नगतः शुभो वा शीर्षोदये सौम्यनिरीक्षितश्च ॥
नष्टस्य लाभं कुरुते तथांशु लाभोपयातो बलवान् शुभश्च ॥५२॥ पूर्णश्च
द्रः चपल लग्ने समवस्थितो भवति ॥ अथवा शीर्षोदये लग्ने तत्रैव च सौम्य १९
ग्रहः समवस्थितः स च शुभग्रहैर्वा वलोकितो भवति ॥ तदा क्षिप्रमेवापहृ

तस्य धनादेर्लाभं कुरुते ॥ लाभोपयातो बलवान् शुभश्चेति ॥ अथवा ल
ग्नादेकादशस्थाने सौम्यग्रहो भवति बलवान् भवति ॥ तथापि चौरो द्यतन
ष्टस्य लाभं कुरुते ॥ आधादेवोक्तयोगानभवे हृतं न लभ्यत इति ॥ अधु
ना दिगध्वनोः प्रमाणमाह ॥ दिग्वाच्या केंद्रगतैरसंभवे वा विलग्न
ऋक्षात् ॥ मध्याच्युते विलग्नान्नवांशयोजना वाच्याः ॥५३॥ प्राच्या
दि गीशाः रवि सित कुज राहु यम इंदु सौम्य वाक्पतयः ॥ इत्याद्युक्ताः ॥
केंद्रगतस्य बलिनो ग्रहस्य दिग्वाच्या ॥ तदसंभवे विलग्नात् दिग्वाच्या ॥
अज वृषभ मिथुन कुलिराः पंचमनवमैः सहेंद्राद्याः इति न्यायात् ॥
तथा पंचमनवमांशकात् च्युते गलिते योजना वाच्या ॥ वक्तव्या ॥
तत्के द्रुत्वे भवति ॥ प्रश्नलग्ने प्रथम नवमांशकात् प्रभृति पंचनवां

ष॰पंचा॰ का॰ट॰

२० शंकं यावद्वर्त्तते तावद्वितं तस्मिन्नेव देशे प्रागुक्तायां दिशि गतं वदेत् ॥ पंचमा
द्देशकासरतोयावतो राका अतीतास्तावंति योजनानि हृतं वित्तं प्रागुक्तायां
दिशि वदेत् ॥ ४७ ॥ इति श्री॰ नष्टप्राप्त्यध्यायः ॥ ४७ ॥ अथ मिश्रका
ध्यायो व्याख्यायते ॥ ॥ तत्रादौ वनगर्भिण्याः पुत्रदुहितृज्ञानमाह ॥
विषमस्थिते अर्के पुत्रे सुतस्य जन्मान्यथांगनायाश्च ॥ लग्नाद्वरस्य नारी
समवास्थिते तोन्यथा वामं ॥ ४८ ॥ शशीनो लग्नं विनान्याविषये स्थाने
स्थिते अर्के पुत्रे सुतस्य प्रादुर्भावं वदेत् ॥ प्राग्लग्नं विषमस्थाने स्व
ति ॥ उक्तं च ॥ विहाय लग्नं विषमसंस्थः सौरोपि पुंजन्मक ×न×
रः [redacted] विलग्नात् इति ॥ अन्यथा कन्यकाया जन्म वदेत् ॥ २०
समस्थानेषु स्त्रीजन्म वदेत् इति ॥ तथा लग्नात् समगते शशीनो वरस्य कं

४०

न्याप्राप्तिर्भवति ॥ विषमस्थाने विपरीतं ॥ नलभ्येसर्थः ॥ अधुनाविवा
हज्ञानमाह ॥ गुरुरविसौम्यैर्दृष्टस्त्रीपुतमदनापरिगःचाशालिग्नात् ॥
भवति विवाहकर्त्ता त्रिकोणकेंद्रेषु वा सौम्याः ॥ ४९ ॥ त्रिसुतमदयारिग
श्चंद्रो ३।५।७।११।९। गुरुरविबुधैर्दृष्टो भवति ॥ तदा प्रश्नेषु विवाह
स्य कर्त्ता भवति ॥ अथवा शुभग्रहत्रिकोणकेंद्रस्था विवाहकर्त्ता शोभ
वति ॥ वाशब्दन्यचोक्षेपः ॥ अधुना वर्षासमये वृष्टिज्ञानमाह ॥
चंद्रार्कयोः सप्तम गो सितार्के सुरवे षट्मे वा पितपाविलग्नात् ॥
द्वितीयद्वादशे क्वपगतो तथा वा वर्षासु वृष्टिं प्रवदेद्विलग्नात् ॥ ५० ॥
चंद्रार्कयोः सकाशात् शुक्रचानिश्चरो यथासंभवं भवतः ॥ ५० ॥

४१

अथवाप्राग्लग्नात्चतुर्थाष्टमेस्तनतइति॥ सुखंचतुर्थमष्टमं प्रसिद्धं ॥ताचेवसि
ताकेशयथासंख्यंवास्मिन् स्थानद्वयेप्रवतः॥ अथवाताचेवसिताकेशविल
ग्नाद्वितीयतृतीयेवाप्रवतः॥ द्वयोर्योस्थानयोतथादाप्राचीषिवर्षणंप्रवदेत्
ब्रूयात्॥ अथनेष्टप्रश्नकालेकोलेवर्षज्ञानमाह॥ सोम्याजलराशिस्थास्तु
तीयधनकेंद्रगःसितेपृक्षे॥ चंद्रवापुष्ययगतेजलराशिस्थेवृद्धपूर्णः
॥४७॥ जलेराशयःकर्कटमकरमीनाः॥ अत्रपक्षोमासाद्धेतुविशे
षः॥ अथप्रहाजलराशिस्थास्तृतीयधनकेंद्रगायदिभवंति ३।
२।१।४।७।१०। यथासंभवंति॥ वाशब्दोन्ययोगपेक्षः॥ अथवाचं
द्रमसिजलराशौस्थिप्राग्लग्नगलेसतितदाप्रवृष्टिंप्रब्रूयादि
ति॥ अथगर्भिण्यागर्भस्थितस्यवस्तुनोज्ञानमाह॥ ४९॥ २१

पुंवर्गेलग्नगतेपुंग्रहदृष्टेबलान्विते पुरुषः॥ युग्मेस्त्रीग्रहदृष्टेस्त्राबुधयुक्ते
स्त्रीगर्भयुक्ता॥४८॥ पुंस्त्रीक्रूराक्रूरौचरस्थिरद्विस्वभावसंज्ञाश्चेति॥
इतिराशिनोसंज्ञाजातकेप्रोक्ता।वर्गेलक्षणंचोक्तं॥ पुरुषराशिवर्गेतत्काल
लग्नतांप्रासे।तस्मिन्रविजीवभार्त्तंडाइति॥ पुंग्रहबलोकितेलग्नेदृष्टए
वंविधेप्रश्नेलग्नेबालान्वितेपुरुषोजायते॥ अधिपयुतोदृष्टोवाबुजीव
निरिक्षितश्चयोराशिः।सत्ववातिबलवान्यदापृक्तोदृष्टोपिवनेतरैरिति
बलाबलेज्ञातव्यं॥ स्त्रीराशौयुग्मलग्नेलग्नगतेवृषादौस्त्रीग्रहदृष्टेचं
द्रसिताभ्यांविलोकितेबलयुक्तेचकन्याजायते॥ सामान्यप्रश्नलग्नेबु
धेनसंयुक्तेस्त्रीसगर्भावर्तते॥ अथापिनस्थितस्यार्थः।अथप्रष्टुः
कीदृशीस्त्रीपुरुषोवाचलसिबलेसइसेतसारिज्ञानमाह॥ कुमारि

म॰पं॰चो॰ टी॰क्री॰

कोबालस्तु शशी बुध्याश्च वत्तृ ऊर्ध्वं शनिः सूर्यगुरू प्रसूतौ ॥ स्त्री कर्क शांशे
२२ मसितो विधत्त एवं वयः स्यात्पुरुषेषु चैवं ॥ ४९ ॥ अत्र कुप्रतिपत्स्यप्तिर
शोम्यंतं यावच्छरीबालः ॥ एकादशपंचदशपंचच भौयावत्तावत्तरुणता
परतो वृद्धः ॥ यत्र यद्दिवस बलो बालो शशी पष्टलोनपशालिल स्तेन वा
दा तथाभूतेव स्थितः ॥ लग्नप्रष्टुमेनासि कुमारिकावर्त्तते ॥ एवमेव बुधः ॥
पश्यति तत्र वा स्थितो वा तथापि कुमारिका ॥ अपोदेव यौवनोपेता
वृद्धदृष्टा भिति ॥ केचित्तु बालां कुमारिकां च बुधशशी चैतिपठंति ॥
शशी बालां करोति ॥ आयुष्यं यौवनं ॥ आयुष्यं दशेनं यानं वृद्धा लो[illegible] २२
स्त्री गा बुधः कुमारिका ॥ अनुरूपं करोति ॥ एवं शनिर्वृद्धात्र ॥ जरा
क्लिष्टतां करोति ॥ पुरुषेप्येवमेव वयोज्ञातव्यं ॥ अथ पष्ठस्थाप्यच्छति

कस्यसंबंधेनाचिंतामे मनसि वर्त्तत इत्येतत्सरितानार्थमाह ॥ आत्मसमं तुर्य
गते स्वतीयगे ष्टोतरं सुतं खुलगे ॥ मातुलं वापा गानी वा चतुर्थगे त्रिशत्रुगेः
शत्रुः ॥ ५१ ॥ भार्यास सप्तमस्थे नवमे धर्माश्रिता गुरुर्दशमे ॥ ५२ ॥ स्वां
शपति मित्रशत्रु पुत्र येनाच्य वजयुतेषु ॥ ५३ ॥ गृहे शादि दोषसबले
लग्नसंस्थे लगतेः प्रष्टुः आत्मसमः स्वशरीरतुल्यः कोप्यन्मनासि वर्त्त
तेऽलकार्यं वेति वक्तव्यं ॥ एवं लग्नात्तृतीयगे भ्रातरं सहजसुत
गेः पंचमस्थे पुत्रः ॥ चतुर्थगे माता ॥ भगिनी वेति वक्तव्यं ॥ शत्रुगे
षष्ठस्थानगे रिपुश्चिंता ॥ सप्तमस्थे स्त्रीयोलग्नात्सप्तमस्थानाश्रि
ते सबले गृहे भार्या वाच्या ॥ नवमस्थे धर्मश्रिता धर्मयुक्तो चिंता
वक्तव्या ॥ दशमे गुरुराचार्य इति ॥ स्वांशपतिस्वादि स्वथ्यासार्वं शाश्चरखांशाः ॥

आत्मीयनवभागस्तस्य पतिः स्वांशपतिः ॥ एवं लग्ने तत्काले यो नवां-
२७ शस्तदधिपतिर्लग्नस्थो यदा भवति तदा प्रष्टुः स्वभावं स्थानं च
जगतीमिति । वाच्यं ॥ अथ स्वांशपतिभिन्नं मुहूर्तं ॥ तत्काल लग्ने
स्थितस्तदा शत्रुचिंता वाच्या ॥ अथ नानाविध स्थाने दोषो हो बहवो
भवंति ॥ तदा तेषां मध्ये यो बलयुतः ॥ स यत्र तस्तत्प्रष्टुः स्थितं स्थि-
तमिवाच्यं ॥ तथा तेनैव प्रकारेण यथाभिहितेन बलयुतेषु वीर्यव
त्सु मध्यात्कार्यं वाच्यमिति ॥ शत्रुमंदासितौ सम श्चशशिजौ मित्रा
णि शेषार वौ तीक्ष्णांशुः हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः ॥
जीवेंदुष्णकराः कुजस्य सुहृदौ ज्ञोरिः सितार्की समौ मित्रे सूर्यसितौ बुध २७
स्य हिमगुः शत्रुः समाश्चापरे ॥ सूरेः सौम्य ×भो× सितावरी रविसुतो

मध्येपरे त्वन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी ॥ शु
क्रेंदौ सुहृदौ समः सुरगुरुः सौरस्य चान्येरयस्तत्कालेन दशायबंधुसह
जस्वांतेषु मित्रं स्थितः ॥ ५१ ॥ इति यवनजातके मित्रामित्रविभाग
॥ प्रदर्शित इति ॥ अथाधुना प्रवासचिंतानमाह ॥ चरलग्ने चरस्था
नो मध्याद्दृष्टे प्रवासचिंता स्यात् ॥ षष्ठः सप्तमभवनात्पुनर्निव
र्त्तायदि न वक्री ॥ ५२ ॥ चरलग्ने चरनवांशके उदिततास्मिन्नेवल
ग्ने मध्यात् पंचमनवांशकात् षष्ठे स्थितेषष्ठादिको ग्रहास्तत्रवर्त्तते ॥
चेत्स्यर्थः ॥ अत्रैव निश्चयमाह ॥ षष्ठः सप्तमभवनादिति ॥ एतत्काले
ल्यात्समायाति ॥ राशिः सप्तमे तत्कालो यदि कश्चिद्ग्रहो षष्ठः स्वलि
ज्ञाते स समायाति ॥ राशिः सप्तमे तत्कालो यदि कश्चिद्ग्रहोन्यत्र गतस्तदा प्रवासी पुनर्निव
र्त्तः ॥ सप्तमो मासादिके स्तत्कालेऽयमन्यत्र गतस्तदा प्रवासी पुनर्निव

ष॰पं॰ टी॰का॰

२९ नोनिच्छन्नः स्यात् ॥ निवर्त्ते तेद्रस्यार्थः ॥ प्रवासाश्चिन्ततोनेनकिं
तु न यास्य ॥ यदि न वक्रोति ॥ यो सौम्यस्य भवनात् ॥ ग्रहोऽष्टमः
स यदा न वक्री ॥ न प्राप्ति प्रवासितस्येतत् तेनार्थमाह ॥ अस्तेरवि
सितवेर्केः परजायास्वांगुरुर्बुधे वेश्यां ॥ चंद्रेन वयःप्राप्ताविवक्तुं
वदेत् सौरिः प्रजालेच्छ ॥५३॥ रविगुरुशुक्रांगारकाणामन्यतं
मे स्थाने पंचमे प्राप्यायास हलस्य संयोगं जारलीत् ॥ एवं गुरोस्थि
ते स्वामात्रीयां स्त्रीयमिति प्रवदेत् ॥ बुधे वेश्यासाधारण
स्त्रियं ॥ चंद्रे चैवं साधारणास्त्रियं प्रवदेत् ॥ तथा सौरे प्रजा
नि कृष्णेप्रज्ञातामगम्यानिति प्रवदेत् ॥ वयः प्राप्तावा दीति ॥ २९
ता सौरस्य वा सौ चंद्रवद्वयो वक्तव्ये ॥ बाचेंद्र वलं ॥ प्रौढ प्रौढा च

४६

वृद्धां इति चंद्रस्य वयोविभागः ॥ प्रागेव दर्शितमिति ॥ अथ रोगार्त्तस्य परदेशास्थि
तस्य मृत्युं तेनमाह ॥ तंद्रः पापसमेतोऽलग्नान्नवमेष्टमे स्थितदृष्टः ॥ रोगा
र्त्तः परदेशी चाष्टमेगोमृत्युकरश्च ॥५४॥ सौरेरो रविभौमक्षीणचंद्राणा
मन्यतमेन युक्तो नवमे स्थाने स्थितस्तत्र शुभे स्थितदृष्टः ॥ तत्र शुभग्रहा
णामन्यतमेन न युक्तो नाप्यवलोकितस्तदा [illegible] रोगा ॥ तस्य परदेशास्थि
तो रोगपीडितो वक्तव्यः ॥ अथानेनैव लक्षणेन युक्तः ॥ सौराष्टमे स्थाने स्थि
तः [illegible] यदा तस्य न रोगार्तस्य मृत्युकरोऽपि ति ॥ अथ कश्चित् [illegible] पृ
च्छति मदीयः पिता अन्यदेशे स्थितस्तत्र कीदृक्षः आपि तिष्ठति अथवा अन्य
देशांतरं गतः ... आह ॥ सौम्ययुतो अर्कः सौम्यैः संदृष्टः चाष्टमे स
स्थश्च ॥ तस्माद्देशादन्यगतस्स वाच्यः पिता जनस्य ॥५५॥ अर्कः सौम्यैः
शुभग्रहैर्युक्तः सहितस्तेषामन्यतमेन दृष्टावलोकितोऽपि वाति ॥

४९

प्र॰पं॰वा॰ टीका॰

२५ तथाभूतो लग्नादष्टमे ग्रहे स्थितस्तु तस्य स्थौष्टमस्थानमुपागतो भवति
तदा तस्य प्रष्टुः पिता तस्माद्देशांतरं गतो वाच्यः ॥ अन्यथा तत्रैव स्थित इति ॥
अधुना हृतस्यार्थस्य स्वरूपं तस्करकालं दिग्देशानां ज्ञानं तस्करस्य करू
रूपं चाह ॥ एवं शंका ज्ञायते द्रव्यं दृष्ट्वा ॥ अस्तस्कराः स्मृतास्ताः राशिस्थः
कालं दिग्देशवेयाज्ञातिश्च लग्नपातु ॥ पद्य ॥ लग्नस्य तात्कालिकस्य नव
मांशाद्द्रव्यमपहृतं यातुमुक्तेभौ वोरव्यं ज्ञायते ॥ तत्तत्पूर्वं वं ध्वानव्यातं ॥
स्यांशं विलग्नेप द्विवात्रिकोणस्यांशे स्थितः पश्यति यातु चिंतामिति ॥ त २५
स्य चरराशि तुल्यो वर्णो वक्तव्यः ॥ तथा च लघुजातके ॥ अरुणसितहरि
तपाटलपांडु चिचित्रः ॥ सितेतरपिशंगो ॥ पिंगलकर्बुरबभ्रू मलिनारुच

योयथासंख्यमिति ॥ मेषादीनां क्रूरचयोयथासंख्यमुक्ताः ॥ तस्य दीर्घम्
ह्रस्वत्वं नवांशकवशात् तेयं ॥ तत्र कुंभमीनमेषवृषा ह्रस्वाः ॥ मिथुनकर्क
टधनमकरा मध्याः ॥ सिंहकन्यातुलवृश्चिका दीर्घाः ॥ तथा चास्मदीयप्र
श्नज्ञाने ॥ मेषवृषकुंभमीनानां ह्रस्वा युग्मकर्कचापमकराः ॥ मध्याह
रियुवतितुलालयः ॥ स्मृता लग्नाद्दीर्घा इति ह्रस्वपरिवर्तनं ॥ मध्या
मैमभायतद्दीर्घं ॥ ह्रस्वादिः दीर्घमतो वा यामे ॥ अंशकपतौ सबलः तः
सुपिरनीचरस्थः ऽस्तमितनानएभ ॥ प्रायमेवमंशकवशात् द्रव्यं ज्ञायते ॥
ह्रस्वादिः ॥ द्रेष्काणलग्नत्रिभागो स्तस्कराश्चौराः उक्ताः स्मृताः ॥ यादृ
शीद्रेष्काणस्याकृतिस्तादृग्रूपवत्तस्करस्यापि वक्तव्या ॥ तद्यथा ॥ मेष
स्य प्रथमो द्रेष्काणः पुरुषः परशुहस्तः कृष्णमारक्तनेत्रो रौद्रः ॥ द्विती
यासितलोहितांबरधरास्थूलोदरो दीर्घमुखे कपदा ॥ तृतीयः

२५९ प्रमान्क्रूरः ॥ कपिलोरक्तांबरोदंड हस्तः ॥ वृषस्यप्रथमः स्त्री कुंचितकृष्णकेशा
स्थूलोदरा दग्धपटा ॥ द्वितीयः नरः कृषिविज्ञो गोलङ्गलकर्मणि कुशलः ॥
तृतीयः नरो वृहत्स्कंधो वृषवदनः ॥ मिथुनस्य प्रथमः स्त्री रूपान्विता हीन
प्रजा आभरणकार्ये कृतादरा ॥ द्वि॰ पुरुष उद्यानसे स्थः केवली धनुष्मा
न्तृतीयः पुमान् रुक्मोविभूषितः ॥ पंडितो धनुष्पाणिः ॥ कर्कटस्य प्रथ
मः ॥ पुरुषो हस्ति शरीर सदृशः ॥ शूकरमुखः ॥ द्वितीयः स्त्री यौव
नोपेता समर्थ्यारण्या स्थिता ॥ तृतीयः पुरुषः सर्पवेष्टितो स्थितः
सुवर्णाभरणान्वितः सिंहप्रथमः ॥ शाल्मलीसंस्थो गृध्रजंबुकाननः
द्वितीयः पुरुषो धनुष्पाणिर्नीलासः तृतीयः कृष्णकुंचितकेशोदंड
हस्तः कन्यायाः प्रथमः स्त्री पुष्पपूर्णेन घटेन मलादिग्धांबरा २५
शावालंबांवति ॥ द्वितीयः पुरुषो गृहीत लेखनी श्यामो

१का वस्त्रविस्तीर्णः ॥ तृतीय स्त्री गौरी कुंभकरच्छक हृदेवालयं प्रवृत्ता ॥ तुला प्रथमः
पुरुषो विथ्यापणगतो मनोन्मान हस्तो भांडं विचिंतयंता ॥ द्वितीयः पुरुष करः ॥ गृध्रमु
खः तृतीयः पुरुषो भिन्नरूपो विभूषयती ॥ वृश्चिकः प्रथमः स्थिनग्नांस्थान च्युता
सर्पसर्पनिबद्धपादा मनोरमा ॥ द्वितीयः स्त्री भर्तृस्नेहे भुजंगावृतः शरीरा स्था
नमरखमीप्सती ॥ तृतीयः पुरुषः श्विपटवक्त्रः धन्वी प्रथमः ॥ पुरुषो धनुष्मा
न्निति द्वितीयः स्त्री रूपा गौरवर्णा तृतीयः पुरुषो रोमशः ॥ स्थूलदंतो वृषनाग
द्रोत्कृवदनः द्वितीयः स्त्री श्यामालंकारान्विता तृतीयः पुरुषो दीर्घमुखो
धनुष्मान् कुंभः प्रथमः पुरुषो गृध्रतुल्यवदनो सकंबलः द्वितीयः स्त्री
रक्तांबरा तृतीयः श्यामः स्रोमवर्णः मीनः प्रथमः पुरुषो नौस्थः द्वि
तीयः स्त्री गौरांगी स्था तृतीयः पुरुषो नग्नो धीरः सर्पवेष्टितांग इति ॥

२७ एतद्बृहज्जातके वराहमिहराचार्येण प्रोक्तं ॥ केचासीलवस्थवेष्टित
इत्यादिना ग्रंथेन ॥ अस्माभिस्त्विह संक्षेपकृतेः प्रयोजनमात्रं दर्शि
तमिति ॥ एवं द्रेष्काणेन स्फुटमुक्तो इति रात्रिसंज्ञ्यः कालादि इतरा
त्रिनो कालाविक्रमाः मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबलाढ्
याः ॥ इति जातके प्रोक्ताः तेन मेषवृषमिथुनकर्किधन्विमकराणाम
न्यतमे लग्ने रात्रिसंज्ञके रात्रावपहृते सिंहकन्यातुलावृश्चिककुं
भमीनानामन्यतमे दिवसंज्ञके दिवसेऽपहृतमितमिति ॥ एवं कालो
त्रेयः ॥ दिक्मेषसिंहधनुर्भिः पूर्वस्यां गतं वृषकन्यामकरैर्दक्षि
णस्यां मिथुनकुंभतुलैः पश्चिमायां ॥ कर्कटवृश्चिकमीनैरुत २७

रस्यां दिशि गतमिति दिक् ॥ मेषलग्ने पशुकाले स्थले मेषवाटस्थमेषो ॥
वृषे गोकुलस्थो मिथुने गीतनृत्यस्थाने स्त्रीग्रामभक्तभोवा ॥ कर्कटे जल
समीपे ॥ सिंहे रणस्थमो कन्यायां नौसमीपे कुंभे सलिल्यगृहभांडोप
रिस्थमीपे वामीने जलसमीपमिति रवचराश्चइति बृहज्जातके प्रोक्तं ॥
वयोज्ञातिश्चलग्नपादिति ॥ चोरस्य वयः प्रमाणं ज्ञातं चेवदत
तथा च संहितायां वयोऽस्तितेषां स्तनपानुपानबाल्यवतस्थितायौ
वनमध्यवृद्धाः ॥ अतिवृद्धा इति चंद्रसौमज्ञशुक्रवागीशार्कात
श्वराणामिति एवं चंद्रे लग्ने शशिक्षेत्रे मे चतुर्वर्षाधिकः बुधेब्र
ह्मचारी द्वादशाब्दः शुक्रे यौवनेपेतो द्वात्रिंशदब्दः ॥ गुरौ मध्यव
याः ॥ वा पंचाशदब्दः ॥ सूर्ये वृद्धः सप्तत्यब्दः ॥ सौरे तीववृद्धो ज्ञा

षपंचा॰ प॰क्रा॰

२८ सर्व्वः ॥ ज्ञातिब्रह्मणादिभिः जीवस्तिताव प्राणां क्षत्रियस्यारो
हम गुविशांचेद्रः ॥ श्री ऋषिपः शाखिखुतः शनैश्चर संकरस्या
वानामिति ॥ ज्ञातिनिर्णयः कार्यः ॥ छ ॥ इति श्रीसहदास
लविराचितायां विद्वज्जोमिश्रकाध्यायः समाप्तः ॥ ॥ शुभं ॥ ॥
शाके १५८७ क्रोधन संवत्सरे चंपावतीस्थे अनंतेन स्वा
र्थं वापरार्थं लिखितं ॥ छ ॥ शुभं भवतु ॥ छ

२८

शाके १५८७
सन १६६५

५६